श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीनामरामायणम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनामरामायणम् ॥

ओं श्रीसीतालक्ष्मण भरतशत्रुघ्न हनुमत्समेत
श्रीरामचन्द्रपरब्रह्मणे नमः

## बालकाण्डम्

१. शुद्धब्रह्मपरात्पर राम
२. कालात्मकपरमेश्वर राम
३. शेषतल्पसुखनिद्रित राम
४. ब्रह्माद्यमरप्रार्थित राम
५. चण्डकिरणकुलमण्डन राम
६. श्रीमद्दशरथनन्दन राम
७. कौसल्यासुखवर्धन राम
८. विश्वामित्रप्रियधन राम
९. घोरताटकाघातक राम
१०. मारीचादिनिपातक राम
११. कौशिकमखसंरक्षक राम
१२. श्रीमदहल्योद्धारक राम
१३. गौतममुनिसम्पूजित राम
१४. सुरमुनिवरगणसंस्तुत राम
१५. नाविकधावितमृदुपद राम
१६. मिथिलापुरजनमोहक राम
१७. विदेहमानसरञ्जक राम
१८. त्र्यम्बककार्मुकभञ्जक राम
१९. सीतार्पितवरमालिक राम
२०. कृतवैवाहिककौतुक राम
२१. भार्गवदर्पविनाशक राम

२२. श्रीमदयोध्यापालक राम
⋆⋆ राम राम जय राजा राम
⋆⋆ राम राम जय सीता राम

## अयोध्याकाण्डम्

२३. अगणितगुणगणभूषित राम
२४. अवनीतनयाकामित राम
२५. राकाचन्द्रसमानन राम
२६. पितृवाक्याश्रितकानन राम
२७. प्रियगुहविनिवेदितपद राम
२८. तत्क्षालितनिजमृदुपद राम
२९. भरद्वाजमुखानन्दक राम
३०. चित्रकूटाद्रिनिकेतन राम
३१. दशरथसन्ततचिन्तित राम
३२. कैकेयीतनयार्थित राम
३३. विरचितनिजपितृकर्मक राम
३४. भरतार्पितनिजपादुक राम
⋆⋆ राम राम जय राजा राम
⋆⋆ राम राम जय सीता राम

## अरण्यकाण्डम्

३५. दण्डकावनजनपावन राम
३६. दुष्टविराधविनाशन राम
३७. शरभङ्गसुतीक्ष्णार्चित राम
३८. अगस्त्यानुग्रहवर्धित राम
३९. गृध्राधिपसंसेवित राम
४०. पञ्चवटीतटसुस्थित राम
४१. शूर्पणखार्तिविधायक राम
४२. खरदूषणमुखसूदक राम

४३. सीताप्रियहरिणानुग राम
४४. मारीचार्तिकृदाशुग राम
४५. विनष्टसीतान्वेषक राम
४६. गृध्राधिपगतिदायक राम
४७. शबरीदत्तफलाशन राम
४८. कबन्धबाहुच्छेदन राम
⋆⋆ राम राम जय राजा राम
⋆⋆ राम राम जय सीता राम

## किष्किन्धाकाण्डम्

४९. हनुमत्सेवितनिजपद राम
५०. नतसुग्रीवाभीष्टद राम
५१. गर्वितवालिसंहारक राम
५२. वानरदूतप्रेषक राम
५३. हितकरलक्ष्मणसंयुत राम
⋆⋆ राम राम जय राजा राम
⋆⋆ राम राम जय सीता राम

## सुन्दरकाण्डम्

५४. कपिवरसन्ततसंस्मृत राम
५५. तद्गतिविघ्नध्वंसक राम
५६. सीताप्राणाधारक राम
५७. दुष्टदशाननदूषित राम
५८. शिष्टहनूमद्भूषित राम
५९. सीतावेदितकाकावन राम
६०. कृतचूडामणिदर्शन राम
६१. कपिवरवचनाश्वासित राम
⋆⋆ राम राम जय राजा राम
⋆⋆ राम राम जय सीता राम

## युद्धकाण्डम्

६२. रावणनिधनप्रस्थित राम
६३. वानरसैन्यसमावृत राम
६४. शोषितसरिदीशार्थित राम
६५. विभीषणाभयदायक राम
६६. पर्वतसेतुनिबन्धक राम
६७. कुम्भकर्णशिरश्छेदक राम
६८. राक्षससङ्घविमर्दक राम
६९. अहिमहिरावणचारण राम
७०. संहृतदशमुखरावण राम
७१. विधिभवमुखसुरसंस्तुत राम
७२. खस्थितदशरथवीक्षित राम
७३. सीतादर्शनमोदित राम
७४. अभिषिक्तविभीषणनत राम
७५. पुष्पकयानारोहण राम
७६. भरद्वाजाभिनिषेवण राम
७७. भरतप्राणप्रियकर राम
७८. साकेतपुरीभूषण राम
७९. सकलस्वीयसमानत राम
८०. रत्नलसत्पीठास्थित राम
८१. पट्टाभिषेकालङ्कृत राम
८२. पार्थिवकुलसम्मानित राम
८३. विभीषणार्पितरङ्गक राम
८४. कीशकुलानुग्रहकर राम
८५. सकलजीवसंरक्षक राम
८६. समस्तलोकाधारक राम
⋆⋆ राम राम जय राजा राम
⋆⋆ राम राम जय सीता राम

## उत्तरकाण्डम्

८७. आगतमुनिगणसंस्तुत राम
८८. विश्रुतदशकण्ठोद्भव राम
८९. सीतालिङ्गननिर्वृत राम
९०. नीतिसुरक्षितजनपद राम
९१. विपिनत्याजितजनकज राम
९२. कारितलवणासुरवध राम
९३. स्वर्गतशम्बुकसंस्तुत राम
९४. स्वतनयकुशलवनन्दित राम
९५. अश्वमेधक्रतुदीक्षित राम
९६. कालावेदितसुरपद राम
९७. आयोध्यकजनमुक्तिद राम
९८. विधिमुखविबुधानन्दक राम
९९. तेजोमयनिजरूपक राम
१००. संसृतिबन्धविमोचक राम
१०१. धर्मस्थापनतत्पर राम
१०२. भक्तिपरायणमुक्तिद राम
१०३. सर्वचराचरपालक राम
१०४. सर्वभवामयवारक राम
१०५. वैकुण्ठालयसंस्थित राम
१०६. नित्यानन्दपदस्थित राम
१०७. राम राम जय राजा राम
१०८. राम राम जय सीता राम

॥ इति श्रीनामरामायणं सम्पूर्णम् ॥